# Lesson 30: Bhagavad Gītā Pages 473 - 474

54. अर्जुनः उवाच । केशव, समाधिस्थस्य स्थित-प्रज्ञस्य का भाषा । स्थित-धीः किं प्रभाषेत, किम् आसीत, किं व्रजेत ।

55. श्रीभगवान् उवाच । पार्थ, यदा सर्वान् मनो-गतान् कामान् प्रजहाति, तदा आत्मनि एव आत्मना तुष्टः स्थित-प्रज्ञः उच्यते ।

56. दुःखेषु अन्-उद्विग्न-मनाः सुखेषु विगत-स्पृहः वीत-राग-भय-क्रोधः मुनिः स्थित-धीः उच्यते ।

57. यः सर्वत्र अन्-अभिस्नेहः, तत् तत् शभु-अशुभं प्राप्य, न अभिनन्दति न द्वेष्टि, तस्य प्रज्ञा प्रतिष्ठिता ।

58. यदा च अयं, कूर्मः इव अंगानि, इन्द्रिय-अर्थेभ्यः इन्द्रियाणि सर्वशः संहरते, तस्य प्रज्ञा प्रतिष्ठिता ।

59. निर्-आहारस्य देहिनः विषयाः रस-वर्जं विनिवर्तन्ते । परं दृष्ट्वा अस्य रसः अपि निवर्तते ।

60. कौन्तेय, प्रमाथीनि हि इन्द्रियाणि यततः विपश्चितः पुरुषस्य अपि मनः प्रसभं हरन्ति ।

61. तानि सर्वाणि संयम्य युक्तः मत्-परः आसीत । यस्य हि इन्द्रियाणि वशे, तस्य प्रज्ञा प्रतिष्ठिता ।

62. विषयान् ध्यायतः पुंसः तेषु संगः जायते । संगात् कामः संजायते, कामात् क्रोधः अभिजायते ।

63. क्रोधात् सम्मोहः भवति, सम्मोहात् स्मृति-विभ्रमः । स्मृति-भ्रंशात् बुद्धि-नाशः, बुद्धि-नाशात् प्रणश्यति ।

64. राग-द्वेष-वियुक्तैः तु आत्म-वश्यैः इन्द्रियैः विषयान् चरन् विधेय-आत्मा प्रसादम् अधिगच्छति ।

65. प्रसादे अस्य सर्व-दुःखानां हानिः उपजायते । प्रसन्न-चेतसः हि बुद्धिः आशु पर्यवतिष्ठते ।

Abbreviations: P = parasmaipada, A = ātmanepada, p- = passive, c- = causative, pres = present, imperf = imperfect, opt = optative, fut = future, perf = perfect, imper = imperative, aor = aorist, ger = gerund, inf = infinitive, denom = denominative, PPP = Past Passive Participle, PrAP = Present Active Participle, PrPP = Present Passive Participle, gerv = gerundive, TP = tatpuruṣa, KD = karmadhāraya, BV = bahuvrīhi, & = dvandva

66. अयुक्तस्य बुद्धिः न अस्ति, न च अयुक्तस्य भावना । न च अभावयतः शान्तिः, अशान्तस्य सुखं कुतः ।

---

67. यद् मनः हि चरतां इन्द्रियाणां अनुविधीयते, तद् अस्य प्रज्ञां हरति, वायुः इव अम्भसि नावम् ।

---

68. महाबाहो, तस्मात् यस्य इन्द्रियाणि इन्द्रियेभ्यः सर्वशः निगृहीतानि, तस्य प्रज्ञा प्रतिष्ठिता ।

---

69. या सर्वभूतानां निशा तस्यां संयमी जागर्ति । यस्यां भूतानि जाग्रति, सा पश्यतः मुनेः निशा ।

---

70. यद्वत् आपः आपूर्यमाणम् अचल-प्रतिष्ठं समुद्रं प्रविशन्ति, तद्वत् सर्वे कामाः यं प्रविशन्ति, सः शान्तिम् आप्नोति, न काम-कामी ।

---

71. यः पुमान् सर्वान् कामान् विहाय निःस्पृहः निर्ममः निरहंकारः चरति, सः शान्तिम् अधिगच्छति ।

---

72. पार्थ, एषा ब्राह्मी स्थितिः, एनां प्राप्य न विमुह्यति । अस्याम् अन्त-काले अपि स्थित्वा ब्रह्म-निर्वाणम् ऋच्छति ।

---

Abbreviations: P = parasmaipada, A = ātmanepada, p- = passive, c- = causative, pres = present, imperf = imperfect, opt = optative, fut = future, perf = perfect, imper = imperative, aor = aorist, ger = gerund, inf = infinitive, denom = denominative, PPP = Past Passive Participle, PrAP = Present Active Participle, PrPP = Present Passive Participle, gerv = gerundive, TP = tatpuruṣa, KD = karmadhāraya, BV = bahuvrīhi, & = dvandva